# MuktikA Upanishad

# મુક્તિકોપનિષત્

## Document Information

Text title : Muktika Upanishad

File name : muktika.itx

Category : upanishhat

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 108 / 108; Shukla Yajurveda - Samanya upanishad

Latest update : May 1, 2000

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# મુક્તિકોપનિષત્

ઈશાદ્યષ્ટોત્તરશતવેદાન્તપટલાશયમ્ ।
મુક્તિકોપનિષદ્વેદ્યં રામચન્દ્રપદં ભજે ॥

હરિઃ ૐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ અયોધ્યાનગરે રમ્યે રત્નમણ્ડપમધ્યમે ।
સીતાભરતસૌમિત્રિશત્રુઘ્નાદ્યૈઃ સમન્વિતમ્ ॥ ૧॥

સનકાદ્યૈર્મુનિગણૈર્વસિષ્ઠાદ્યૈઃ શુકાદિભિઃ ।
અન્યૈર્ભાગવતૈશ્ચાપિ સ્તૂયમાનમહર્નિશમ્ ॥ ૨॥

ધીવિક્રિયાસહસ્રાણાં સાક્ષિણં નિર્વિકારિણમ્ ।
સ્વરૂપધ્યાનનિરતં સમાધિવિરમે હરિમ્ ॥ ૩॥

ભક્ત્યા શુશ્રૂષયા રામં સ્તુવન્પપ્રચ્છ મારુતિઃ ।
રામ ત્વં પરમાત્માસિ સચ્ચિદાનન્દવિગ્રહઃ ॥ ૪॥

ઇદાનીં ત્વાં રઘુશ્રેષ્ઠ પ્રણમામિ મુહુર્મુહુઃ ।
ત્વદ્રૂપં જ્ઞાતુમિચ્છામિ તત્ત્વતો રામ મુક્તયે ॥ ૫॥

અનાયાસેન યેનાહં મુચ્યેયં ભવબન્ધનાત્ ।
કૃપયા વદ મે રામ યેન મુક્તો ભવામ્યહમ્ ॥ ૬॥

સાધુ પૃષ્ટં મહાબાહો વદામિ શ‍ૃણુ તત્ત્વતઃ ।
વેદાન્તે સુપ્રતિષ્ઠોઽહં વેદાન્તં સમુપાશ્રય ॥ ૭॥

વેદાન્તાઃ કે રઘુશ્રેષ્ઠ વર્તન્તે કુત્ર તે વદ ।
હનૂમઞ્છૃણુ વક્ષ્યામિ વેદાન્તસ્થિતિમઞ્જસા ॥ ૮॥

નિશ્વાસભૂતા મે વિષ્ણોર્વેદા જાતાઃ સુવિસ્તરાઃ ।

તિલેષુ તૈલવદ્વેદે વેદાન્તઃ સુપ્રતિષ્ઠિતઃ ॥ ૯॥

રામ વેદાઃ કતિવિધાસ્તેષાં શાખાશ્ચ રાઘવ ।
તાસૂપનિષદાઃ કાઃ સ્યુઃ કૃપયા વદ તત્ત્વતઃ ॥ ૧૦॥

શ્રીરામ ઉવાચ ।
ઋગ્વેદાદિવિભાગેન વેદાશ્ચત્વાર ઈરિતાઃ ।
તેષાં શાખા હ્યનેકાઃ સ્યુસ્તાસૂપનિષદસ્તથા ॥ ૧૧॥

ઋગ્વેદસ્ય તુ શાખાઃ સ્યુરેકવિંશતિસઙ્ખ્યકાઃ ।
નવાધિકશતં શાખા યજુષો મારુતાત્મજ ॥ ૧૨॥

સહસ્રસઙ્ખ્યયા જાતાઃ શાખાઃ સામ્નઃ પરન્તપ ।
અથર્વણસ્ય શાખાઃ સ્યુઃ પઞ્ચાશદ્ભેદતો હરે ॥ ૧૩॥

એકૈકસ્યાસ્તુ શાખાયા એકૈકોપનિષન્મતા ।
તાસામેકામૃચં યશ્ચ પઠતે ભક્તિતો મયિ ॥ ૧૪॥

સ મત્સાયુજ્યપદવીં પ્રાપ્નોતિ મુનિદુર્લભામ્ ।
રામ કેચિન્મુનિશ્રેષ્ઠા મુક્તિરેકેતિ ચક્ષિરે ॥ ૧૫॥

કેચિત્ત્વન્નામભજનાત્કાશ્યાં તારોપદેશતઃ ।
અન્યેતુ સાઙ્ખ્યયોગેન ભક્તિયોગેન ચાપરે ॥ ૧૬॥

અન્યે વેદાન્તવાક્યાર્થવિચારાત્પરમર્ષયઃ ।
સાલોક્યાદિવિભાગેન ચતુર્ધા મુક્તિરીરિતા ॥ ૧૭॥

સહોવાચ શ્રીરામઃ ।
કૈવલ્યમુક્તિરેકૈવ પરમાર્થિકરૂપિણી ।
દુરાચારરતો વાપિ મન્નામભજનાત્કપે ॥ ૧૮॥

સાલોક્યમુક્તિમાપ્નોતિ ન તુ લોકાન્તરાદિકમ્ ।
કાશ્યાં તુ બ્રહ્મનાલેઽસ્મિન્મૃતો મત્તારમાપ્નુયાત્ ॥ ૧૯॥

પુનરાવૃત્તિરહિતાં મુક્તિં પ્રાપ્નોતિ માનવઃ ।
યત્ર કુત્રાપિ વા કાશ્યાં મરણે સ મહેશ્વરઃ ॥ ૨૦॥

જન્તોર્દક્ષિણકર્ણે તુ મત્તારં સમુપાદિશેત્ ।
નિર્ધૂતાશેષપાપૌઘો મત્સારૂપ્યં ભજત્યયમ્ ॥ ૨૧॥

સૈવ સાલોક્યસારૂપ્યમુક્તિરત્યભિધીયતે ।

સદાચારરતો ભૂત્વા દ્વિજો નિત્યમનન્યધીઃ ॥ ૨૨॥

મયિ સર્વાત્મકો ભાવો મત્સામીપ્યં ભજત્યયમ્ ।
સૈવ સાલોક્યસારૂપ્યસામીપ્યા મુક્તિરિષ્યતે ॥ ૨૩॥

ગુરૂપદિષ્ટમાર્ગેણ ધ્યાયન્મદ્ગુણમવ્યયમ્ ।
મત્સાયુજ્યં દ્વિજઃ સમ્યગ્ભજેદ્ભ્રમરકીટવત્ ॥ ૨૪॥

સૈવ સાયુજ્યમુક્તિઃ સ્યાદ્બ્રહ્માનન્દકરી શિવા ।
ચતુર્વિધા તુ યા મુક્તિર્મદુપાસનયા ભવેત્ ॥ ૨૫॥

ઇયં કૈવલ્યમુક્તિસ્તુ કેનોપાયેન સિદ્ધ્યતિ ।
માણ્ડૂક્યમેકમેવાલં મુમુક્ષૂણાં વિમુક્તયે ॥ ૨૬॥

તથાપ્યસિદ્ધં ચેજ્જ્ઞાનં દશોપનિષદં પઠ ।
જ્ઞાનં લબ્ધ્વા ચિરાદેવ મામકં ધામ યાસ્યસિ ॥ ૨૭॥

તથાપિ દૃઢતા ન ચેદ્વિદ્જ્ઞાનસ્યાઞ્જનાસુત ।
દ્વાત્રિંશાખ્યોપનિષદં સમભ્યસ્ય નિવર્તય ॥ ૨૮॥

વિદેહમુક્તાવિચ્છા ચેદષ્ટોત્તરશતં પઠ ।
તાસાં ક્રમં સશાન્તિં ચ શ્રુણુ વક્ષ્યામિ તત્ત્વતઃ ॥ ૨૯॥

ઈશકેનકઠપ્રશ્નમુણ્ડમાણ્ડૂક્યતિત્તિરિઃ ।
ઐતરેયં ચ છાન્દોગ્યં બૃહદારણ્યકં તથા ॥ ૩૦॥

બ્રહ્મકૈવલ્યજાબાલશ્વેતાશ્વો હંસ આરુણિઃ ।
ગર્ભો નારાયણો હંસો બિન્દુર્નાદશિરઃ શિખા ॥ ૩૧॥

મૈત્રાયણી કૌષીતકી બૃહજ્જાબાલતાપની ।
કાલાગ્નિરુદ્રમૈત્રેયી સુબાલક્ષુરિમન્ત્રિકા ॥ ૩૨॥

સર્વસારં નિરાલમ્બં રહસ્યં વજ્રસૂચિકમ્ ।
તેજોનાદધ્યાનવિદ્યાયોગતત્ત્વાત્મબોધકમ્ ॥ ૩૩॥

પરિવ્રાટ્ ત્રિશિખી સીતા ચૂડા નિર્વાણમણ્ડલમ્ ।
દક્ષિણા શરભં સ્કન્દં મહાનારાયણાહ્વયમ્ ॥ ૩૪॥

રહસ્યં રામતપનં વાસુદેવં ચ મુદ્ગલમ્ ।
શાણ્ડિલ્યં પૈઙ્ગલં ભિક્ષુમહચ્છારીરકં શિખા ॥ ૩૫॥

તુરીયાતીતસંન્યાસપરિવ્રાજાક્ષમાલિકા ।
અવ્યક્તૈકાક્ષરં પૂર્ણા સૂર્યાક્ષ્યધ્યાત્મકુણ્ડિકા ॥ ૩૬॥

સાવિત્ર્યાત્મા પાશુપતં પરં બ્રહ્માવધૂતકમ્ ।
ત્રિપુરાતપનં દેવીત્રિપુરા કઠભાવના ।
હૃદયં કુણ્ડલી ભસ્મ રુદ્રાક્ષગણદર્શનમ્ ॥ ૩૭॥

તારસારમહાવાક્ય પઞ્ચબ્રહ્માગ્નિહોત્રકમ્ ।
ગોપાલતપનં કૃષ્ણં યાજ્ઞવલ્ક્યં વરાહકમ્ ॥ ૩૮॥

શાટ્યાયની હયગ્રીવં દત્તાત્રેયં ચ ગારુડમ્ ।
કલિજાબાલિસૌભાગ્યરહસ્યઋચમુક્તિકા ॥ ૩૯॥

એવમષ્ટોત્તરશતં ભાવનાત્રયનાશનમ્ ।
જ્ઞાનવૈરાગ્યદં પુંસાં વાસનાત્રયનાશનમ્ ॥ ૪૦॥

પૂર્વોત્તરેષુ વિહિતતત્તચ્છાન્તિપુરઃસરમ્ ।
વેદવિદ્યાવ્રતસ્નાતદેશિકસ્ય મુખાત્સ્વયમ્ ॥ ૪૧॥

ગૃહીત્વાષ્ટોત્તરશતં યે પઠન્તિ દ્વિજોત્તમાઃ ।
પ્રારબ્ધક્ષયપર્યન્તં જીવન્મુક્તા ભવન્તિ તે ॥ ૪૨॥

તતઃ કાલવશાદેવ પ્રારબ્ધે તુ ક્ષયં ગતે ।
વૈદેહીં મામકીં મુક્તિં યાન્તિ નાસ્ત્યત્રસંશયઃ ॥ ૪૩॥

સર્વોપનિષદાં મધ્યે સારમષ્ટોત્તરશતમ્ ।
સકૃચ્છ્રવણમાત્રેણ સર્વાઘૌઘનિકૃન્તનમ્ ॥ ૪૪॥

મયોપદિષ્ટં શિષ્યાય તુભ્યં પવનનન્દન ।
ઇદં શાસ્ત્રં મયાદિષ્ટં ગુહ્યમષ્ટોત્તરં શતમ્ ॥ ૪૫॥

જ્ઞાનતોઽજ્ઞાનતો વાપિ પઠતાં બન્ધમોચકમ્ ।
રાજ્યં દેયં ધનં દેયં યાચતઃ કામપૂરણમ્ ॥ ૪૫॥

ઇદમષ્ટોત્તરશતં ન દેયં યસ્ય કસ્યચિત્ ।
નાસ્તિકાય કૃતઘ્નાય દુરાચારરતાય વૈ ॥ ૪૭॥

મદ્ભક્તિવિમુખાયાપિ શાસ્ત્રગર્તેષુ મુહ્યતે ।
ગુરુભક્તિવિહીનાય દાતવ્યં ન કદાચન ॥ ૪૮॥

સેવાપરાય શિષ્યાય હિતપુત્રાય મારુતે ।

મદ્ભક્તાય સુશીલાય કુલીનાય સુમેધસે ॥ ૪૯॥

સમ્યક્ પરીક્ષ્ય દાતવ્યમેવમષ્ટોત્તરં શતમ્ ।
યઃ પઠેચ્છૃણુયાદ્વાપિ સ મામેતિ ન સંશયઃ ।
તદેતદૃચાભ્યુક્તમ્ ।
વિદ્યા હ વૈ બ્રાહ્મણમાજગામ
 ગોપાય મા શેવધિષ્ટેઽહમસ્મિ ।
અસૂયકાયાનૃજવે શઠાય
 મા મા બ્રૂયા વીર્યવતી તથા સ્યામ્ ।
યમેવ વિદ્યાશ્રુતમપ્રમત્તં
 મેધાવિનં બ્રહ્મચર્યોપપન્નમ્ ।
તસ્મા ઇમામુપસન્નાય સમ્યક્
 પરીક્ષ્ય દદ્યાદ્વૈષ્ણવીમાત્મનિષ્ઠામ્ ॥ ૧॥ ઇતિ ॥

અથ હૈનં શ્રીરામચન્દ્રં મારુતિઃ પપ્રચ્છ
ઋગ્વેદાદિવિભાગેન પૃથક્ શાન્તિમનુબ્રૂહીતિ ।
સ હોવાચ શ્રીરામઃ ।
ઐતરેયકૌષીતકીનાદબિન્દ્વાત્મપ્રબોધનિર્વાણ-
મુદ્ગલાક્ષમાલિકાત્રિપુરાસૌભાગ્યબહ્વૃચા
નામૃગ્વેદગતાનાં દશસંખ્યાકાનામુપનિષદાં
વાઙ્મે મનસીતિ શાન્તિઃ ॥ ૧॥

ઈશાવાસ્યબૃહદારણ્યજાબાલહંસપરમહંસસુબાલ-
મન્ત્રિકાનિરાલમ્બત્રિશિખીબ્રાહ્મણમણ્ડલબ્રાહ્મણાદ્વયતારક-
પૈઙ્ગલભિક્ષુતુરીયાતીતાધ્યાત્મતારસારયાજ્ઞવલ્ક્ય-
શાટ્યાયનીમુક્તિકાનાં શુક્લયજુર્વેદગતાનામેકોનવિંશતિ-
સંખ્યાકાનામુપનિષદાં પૂર્ણમદ ઇતિ શાન્તિઃ ॥ ૨॥

કઠવલ્લીતૈત્તિરીયકબ્રહ્મકૈવલ્યશ્વેતાશ્વતરગર્ભ-
નારાયણામૃતબિન્દ્વમૃતનાદકાલાગ્નિરુદ્રક્ષુરિકા-
સર્વસારશુકરહસ્યતેજોબિન્દુધ્યાનબિન્દુબ્રહ્મવિદ્યા-
યોગતત્ત્વદક્ષિણામૂર્તિસ્કન્દશારીરકયોગશિખૈકાક્ષર-
અક્ષ્યવધૂતકઠરુદ્રહૃદયયોગકુણ્ડલિનીપઞ્ચબ્રહ્મ-
પ્રાણાગ્નિહોત્રવરાહકલિસન્તરણસરસ્વતીરહસ્યાનાં

કૃષ્ણયજુર્વેદગતાનાં દ્વાત્રિંશત્સંખ્યાકાનમુપનિષદાં
સહ નાવવત્વિતિ શાન્તિઃ ॥ ૩॥

કેનછાન્દોગ્યારુણિમૈત્રાયણિમૈત્રેયીવજ્રસૂચિકાયોગચૂડામણિ-
વાસુદેવમહત્સંન્યાસાવ્યક્તકુણ્ડિકાસાવિત્રીરુદ્રાક્ષજાબાલદર્શન-
જાબાલીનાં સામવેદગતાનાં ષોડશસંખ્યાકાના-
મુપનિષદાનામાપ્યાયન્ત્વિતિ શાન્તિઃ ॥ ૪॥

પ્રશ્નમુણ્ડકમાણ્ડુક્યાથર્વશિરોઽથર્વશિખાબૃહજ્જાબાલ-
નૃસિંહતાપનીનારદપરિવ્રાજકસીતાશરભમહાનારાયણ-
રામરહસ્યરામતાપનીશાણ્ડિલ્યપરમહંસપરિવ્રાજક-
અન્નપૂર્ણાસૂર્યાત્મપાશુપતપરબ્રહ્મત્રિપુરાતપનદેવીભાવના-
બ્રહ્મજાબાલગણપતિમહાવાક્યગોપાલતપનકૃષ્ણહયગ્રીવ-
દત્તાત્રેયગારુડાનામથર્વવેદગતાનામેકત્રિંશત્સંખ્યાકાના-
મુપનિષદાં ભદ્રં કર્ણેભિરિતિ શાન્તિઃ ॥ ૫॥

મુમુક્ષવઃ પુરુષાઃ સાધનચતુષ્ટયસમ્પન્નાઃ
શ્રદ્ધાવન્તઃ સુકુલભવં શ્રોત્રિયં શાસ્ત્રવાત્સલ્ય-
ગુણવન્તમકુટિલં સર્વભૂતહિતેરતં દયાસમુદ્રં સદ્ગુરું
વિધિવદુપસંગમ્યોપહારપાણયોઽષ્ટોત્તરશતોપનિષદં
વિધિવદધીત્ય શ્રવણમનનનિદિધ્યાસનાનિ નૈરન્તર્યેણ કૃત્વા
પ્રારબ્ધક્ષયાદ્દેહત્રયભંગં પ્રાપ્યોપાધિવિનિર્મુક્ત-
ઘટાકાશવત્પરિપૂર્ણતા વિદેહમુક્તિઃ । સૈવ કૈવલ્યમુક્તિરિતિ ।
અત એવ બ્રહ્મલોકસ્થા અપિ બ્રહ્મમુખાદ્વેદાન્તશ્રવણાદિ કૃત્વા
તેન સહ કૈવલ્યં લભન્તે । અતઃ સર્વેષાં કૈવલ્યમુક્તિર્જ્ઞાનમાત્રેણોક્તા ।
ન કર્મસાંખ્યયોગોપાસનાદિભિરિત્યુપનિષત્ ॥

ઇતિ પ્રથમોઽધ્યાયઃ ॥ ૧॥

તથા હૈનં શ્રીરામચન્દ્રં મારુતિઃ પપ્રચ્છ ।
કેયં વા તત્સિદ્ધિઃ સિદ્ધ્યા વા કિં પ્રયોજનમિતિ ।
સહોવાચ શ્રીરામઃ । પુરુષસ્ય કર્તૃત્વભોક્તૃત્વ-
સુખદુઃખાદિલક્ષણશ્ચિત્તધર્મઃ ક્લેશરૂપત્વાદ્બન્ધો
ભવતિ । તન્નિરોધનં જીવન્મુક્તિઃ । ઉપાધિવિનિર્મુક્ત-
ઘટાકાશવત્પ્રારબ્ધક્ષયાદ્વિદેહમુક્તિઃ ।

જીવન્મુક્તિવિદેહમુક્ત્યોરષ્ટોત્તરશતોપનિષદઃ પ્રમાણમ્ ।
કર્તૃત્વાદિદુઃખનિવૃત્તિદ્વારા નિત્યાનન્દાવાપ્તિઃ પ્રયોજનં
ભવતિ । તત્પુરુષપ્રયત્નસાધ્યં ભવતિ । યથા પુત્રકામેષ્ટિના
પુત્રં વાણિજ્યાદિના વિત્તં જ્યોતિષ્ટોમેન સ્વર્ગં તથા
પુરુષપ્રયત્નસાધ્યવેદાન્તશ્રવણાદિજનિતસમાધિના
જીવન્મુક્ત્યાદિલાભો ભવતિ । સર્વવાસનાક્ષયાત્તલ્લાભઃ ।
અત્ર શ્લોકા ભવન્તિ ॥

ઉચ્છાસ્ત્રં શાસ્ત્રિતં ચેતિ પૌરુષં દ્વિવિધં મતમ્ ।
અત્રોચ્છસ્ત્રમનર્થાય પરમાર્થાય શાસ્ત્રિતમ્ ॥ ૧॥

લોકવાસનયા જન્તોઃ શાસ્ત્રવાસનયાપિ ચ ।
દેહવાસનયા જ્ઞાનં યથાવન્નૈવ જાયતે ॥ ૨॥

દ્વિવિધા વાસનાવ્યૂહઃ શુભશ્ચૈવાશુભશ્ચ તૌ ।
વાસનૌઘેન શુદ્ધેન તત્ર ચેદનુનીયસે ॥ ૩॥

તત્ક્રમેણાશુ તેનૈવ મામકં પદમાપ્નુહિ ।
અથ ચેદશુભો ભાવસ્ત્વાં યોજયતિ સંકટે ॥ ૪॥

પ્રાક્તનસ્તદસૌ યત્નાજ્જેતવ્યો ભવતા કપે ।
શુભાશુભાભ્યાં માર્ગાભ્યાં વહન્તી વાસનાસરિત્ ॥ ૫॥

પૌરુષેણ પ્રયત્નેન યોજનીયા શુભે પથિ ।
અશુભેષુ સમાવિષ્ટં શુભેષ્વેવાવતારયેત્ ॥ ૬॥

અશુભાચ્ચાલિતં યાતિ શુભં તસ્માદપીતરત્ ।
પૌરુષેણ પ્રયત્નેન લાલયેચ્ચિત્તબાલકમ્ ॥૭॥

દ્રાગભ્યાસવશાદ્યાતિ યદા તે વાસનોદયમ્ ।
તદાભ્યાસસ્ય સાફલ્યં વિદ્ધિ ત્વમમરિમર્દન ॥ ૮॥

સન્દિગ્ધાયામપિ ભૃશં શુભામેવ સમાચર ।
શુભાયાં વાસનાવૃદ્ધૌ ન દોષાય મરુત્સુત ॥ ૯॥

વાસનાક્ષયવિજ્ઞાનમનોનાશા મહામતે ।
સમકાલં ચિરાભ્યસ્તા ભવન્તિ ફલદા મતાઃ ॥ ૧૦॥

ત્રય એવં સમં યાવન્નાભ્યસ્તાશ્ચ પુનઃ પુનઃ ।

તાવન્ન પદસમ્પ્રાપ્તિર્ભવત્યપિ સમાશતૈઃ ॥ ૧૧॥

એકૈકશો નિષેવ્યન્તે યદ્યેતે ચિરમપ્યલમ્ ।
તન્ન સિદ્ધિં પ્રયચ્છન્તિ મન્ત્રાઃ સંકીર્તિતા ઇવ ॥ ૧૨॥

ત્રિભિરેતૈશ્ચિરાભ્યસ્તૈર્હૃદયગ્રન્થયો દૃઢાઃ ।
નિઃશઙ્કમેવ ત્રુટ્યન્તિ બિસચ્છેદાદ્ગુણા ઇવ ॥ ૧૩॥

જન્માન્તશતાભ્યસ્તા મિથ્યા સંસારવાસના ।
સા ચિરાભ્યાસયોગેન વિના ન ક્ષીયતે ક્વચિત્ ॥ ૧૪॥

તસ્માત્સૌમ્ય પ્રયત્નેન પૌરુષેણ વિવેકિના ।
ભોગેચ્છાં દૂરતસ્ત્યક્ત્વા ત્રયમેવ સમાશ્રય ॥ ૧૫॥

તસ્માદ્વાસનયા યુક્તં મનો બદ્ધં વિદુર્બુધાઃ ।
સમ્યગ્વાસનયા ત્યક્તં મુક્તમિત્યભિધીયતે ।
મનોનિર્વાસનીભાવમાચરાશુ મહાકપે ॥ ૧૬॥

સમ્યગાલોચનાત્સત્યાદ્વાસના પ્રવિલીયતે ।
વાસનાવિલયે ચેતઃ શમમાયાતિ દીપવત્ ॥ ૧૭॥

વાસનાં સમ્પરિત્યજ્ય મયિ ચિન્માત્ર વિગ્રહે ।
યસ્તિષ્ઠતિ ગતો વ્યગ્રઃ સોઽહં સચ્ચિત્સુખાત્મકઃ ॥ ૧૮॥

સમાધિમથ કાર્યાણિ મા કરોતુ કરોતુ વા ।
હૃદયેનાત્તસર્વેહો મુક્ત એવોત્તમાશયઃ ॥ ૧૯॥

નૈષ્કર્મ્યેણ ન તસ્યાર્થસ્તસ્યાર્થોઽસ્તિ ન કર્મભિઃ ।
ન સસાધનજાપ્યાભ્યાં યસ્ય નિર્વાસનં મનઃ ॥ ૨૦॥

સંત્યક્તવાસનાન્મૌનાદૃતે નાસ્ત્યુત્તમં પદમ્ ॥ ૨૧॥

વાસનાહીનમપ્યેતચ્ચક્ષુરાદીન્દ્રિયં સ્વતઃ ।
પ્રવર્તતે બહિઃ સ્વાઽર્થે વાસનામાત્રકારણમ્ ॥ ૨૨॥

અયત્નોપનતેષ્વક્ષિ દૃગ્દ્રવ્યેષુ યથા પુનઃ ।
નીરાગમેવ પતતિ તદ્વત્કાર્યેષુ ધીરધીઃ ॥ ૨૩॥

ભાવસંવિત્પ્રકટિતામનુરૂપા ચ મારુતે ।
ચિત્તસ્યોત્પત્ત્યુપરમા વાસનાં મુનયો વિદુઃ ॥ ૨૪॥

દૃઢાભ્યસ્તપદાર્થૈકભાવનાદતિચઞ્ચલમ્ ।
ચિત્તં સંજાયતે જન્મજરામરણકારણમ્ ॥ ૨૫॥

વાસનાવશતઃ પ્રાણસ્પન્દસ્તેન ચ વાસના ।
ક્રિયતે ચિત્તબીજસ્ય તેન બીજાઙ્કુરક્રમઃ ॥ ૨૬॥

દ્વે બીજે ચિત્તવૃક્ષસ્ય પ્રાણસ્પન્દનવાસને ।
એકસ્મિંશ્ચ તયોઃ ક્ષીણે ક્ષિપ્રં દ્વે અપિ નશ્યતઃ ॥ ૨૭॥

અસઙ્ગવ્યવહારત્વાદ્ભવભાવનવર્જનાત્ ।
શરીરનાશદર્શિત્વાદ્વાસના ન પ્રવર્તતે ।
વાસનાસમ્પરિત્યાગાચ્ચિતં ગચ્છત્યચિત્તતામ્ ॥ ૨૮॥

અવાસનત્વાત્સતતં યદા ન મનુતે મનઃ ।
અમનસ્તા તદોદેતિ પરમોપશમપ્રદા ॥ ૨૯॥

અવ્યુત્પન્નમના યાવદ્ભવાનજ્ઞાતતત્પદઃ ।
ગુરુશાસ્ત્રપ્રમાણૈસ્તુ નિર્ણીતં તાવદાચર ॥ ૩૦॥

તતઃ પક્વકષાયેણ નૂનં વિજ્ઞાત વસ્તુના ।
શુભોઽપ્યસૌ ત્વયા ત્યાજ્યો વાસનૌઘો નિરાધિના ॥ ૩૧॥

દ્વિવિધચિત્તનાશોઽસ્તિ સરૂપોઽરૂપ એવ ચ ।
જીવન્મુક્તઃ સરૂપઃ સ્યાદરૂપો દેહમુક્તિગઃ ॥ ૩૨॥

અસ્ય નાશમિદાનીં ત્વં પાવને શ્રુણુ સાદરમ્ ॥ ૩૩।
ચિત્તાનાશાભિધાનં હિ યદા તે વિદ્યતે પુનઃ ।
મૈત્ર્યાદિભિર્ગુણૈર્યુક્તં શાન્તિમેતિ ન સંશયઃ ।
ભૂયોજન્મવિનિર્મુક્તં જીવન્મુક્તસ્ય તન્મનઃ ॥ ૩૪॥

સરૂપોઽસૌ મનોનાશો જીવન્મુક્તસ્ય વિદ્યતે ।
અરૂપસ્તુ મનોનાશો વૈદેહી મુક્તિગો ભવેત્ ॥ ૩૫॥

સહસ્રાઙ્કુરશાખાત્મફલપલ્લવશાલિનઃ ॥ ૩૬॥

અસ્ય સંસારવૃક્ષસ્ય મનોમૂલમિદં સ્થિતમ્ ।
સંકલ્પ એવ તન્મન્યે સંકલ્પોપશમેન તત્ ॥ ૩૭॥

શોષયાશુ યથા શોષમેતિ સંસારપાદપઃ ।
ઉપાય એક એવાસ્તિ મનસઃ સ્વસ્ય નિગ્રહે ॥ ૩૮॥

મનસોऽભ્યુદયો નાશો મનોનાશો મહોદયઃ ।
જ્ઞમનો નાશમભ્યેતિ મનો જ્ઞસ્ય હિ શૃઙ્ખલા ॥ ૩૯॥

તાવન્નિશીવ વેતાલા વલ્ગન્તિ હૃદિ વાસનાઃ ।
એકતત્ત્વદૃઢાભ્યાસાદ્યાવન્ન વિજિતં મનઃ ॥ ૪૦॥

પ્રક્ષીણચિત્તદર્પસ્ય નિગૃહીતેન્દ્રિયદ્વિષઃ ।
પદ્મિન્ય ઇવ હેમન્તે ક્ષીયન્તે ભોગવાસનાઃ ॥ ૪૧॥

હસ્તં હસ્તેન સમ્પીડ્ય દન્તૈર્દન્તાન્વિચૂર્ણ્ય ચ ।
અઙ્ગાન્યઙ્ગૈઃ સમાક્રમ્ય જયેદાદૌ સ્વકં મનઃ ॥ ૪૨॥

ઉપવિશ્યોપવિશ્યૈકાં ચિન્તકેન મુહુર્મુહુઃ ।
ન શક્યતે મનો જેતું વિના યુક્તિમનિન્દિતામ્ ॥ ૪૩॥

અઙ્કુશેન વિના મત્તો યથા દુષ્ટમતઙ્ગજઃ ।
અધ્યાત્મવિદ્યાધિગમઃ સાધુસંગતિરેવ ચ ॥ ૪૪॥

વાસનાસમ્પરિત્યાગઃ પ્રાણસ્પન્દનિરોધનમ્ ।
એતાસ્તા યુક્તયઃ પુષ્ટાઃ સન્તિ ચિત્તજયે કિલ ॥ ૪૫॥

સતીષુ યુક્તિષ્વેતાસુ હઠાન્નિયમન્તિ યે ।
ચેતસો દીપમુત્સૃજ્ય વિચિન્વન્તિ તમોऽઞ્જનૈઃ ॥ ૪૬॥

વિમૂઢાઃ કર્તુમુદ્યુક્તા યે હઠાચ્ચેતસો જયમ્ ।
તે નિબધ્નન્તિ નાગેન્દ્રમુન્મત્તં બિસતન્તુભિઃ ॥ ૪૭॥

દ્વે બીજે ચિત્તવૃક્ષસ્ય વૃત્તિવ્રતતિધારણઃ ।
એકં પ્રાણપરિસ્પન્દો દ્વિતીયં દૃઢભાવના ॥ ૪૮॥

સા હિ સર્વગતા સંવિત્પ્રાણાસ્પન્દેન ચાલ્યતે ।
ચિત્તૈકાગ્ર્યાદ્યતો જ્ઞાનમુક્તં સમુપજાયતે ॥ ૪૯॥

તત્સાધનમથો ધ્યાનં યથાવદુપદિશ્યતે ।
વિનાપ્યવિકૃતિં કૃત્સ્નાં સંભવવ્યત્યયક્રમાત્ ।
યશોऽરિષ્ટં ચ ચિન્માત્રં ચિદાનન્દં વિચિન્તય ॥ ૫૦॥

અપાનેऽસ્તંગતે પ્રાણો યાવન્નાભ્યુદિતો હૃદિ ।
તાવત્સા કુંભકાવસ્થા યોગિભિર્યાનુભૂયતે ॥ ૫૧॥

બહિરસ્તંગતે પ્રાણે યાવન્નાપાન ઉદ્ગતઃ ।

તાવત્પૂર્ણાં સમાવસ્થાં બહિષ્ઠં કુમ્ભકં વિદુઃ ॥ ૫૨॥

બ્રહ્માકારમનોવૃત્તિપ્રવાહોઽહંકૃતં વિના ।
સમ્પ્રજ્ઞાતસમાધિઃ સ્યાદ્ધ્યાનાભ્યાસપ્રકર્ષતઃ ॥ ૫૩॥

પ્રશાન્તવૃત્તિકં ચિત્તં પરમાનન્દદાયકમ્ ।
અસમ્પ્રજ્ઞાતનામાયં સમાધિર્યોગિનાં પ્રિયઃ ॥ ૫૪॥

પ્રભાશૂન્યં મનઃશૂન્યં બુદ્ધિશૂન્યં ચિદાત્મકમ્ ।
અતદ્વ્યાવૃત્તિરૂપોઽસૌ સમાધિર્મુનિભાવિતઃ ॥ ૫૫॥

ઊર્ધ્વપૂર્ણમધઃપૂર્ણં મધ્યપૂર્ણં શિવાત્મકમ્ ।
સાક્ષાદ્વિધિમુખો હ્યેષ સમાધિઃ પારમાર્થિકઃ ॥ ૫૬॥

દૃઢભાવનયા ત્યક્તપૂર્વાપરવિચારણમ્ ।
યદાદાનં પદાર્થસ્ય વાસના સા પ્રકીર્તિતા ॥ ૫૭॥

ભાવિતં તીવ્રસંવેગાદાત્મના યત્તદેવ સઃ ।
ભવત્યાશુ કપિશ્રેષ્ઠ વિગતેતરવાસનઃ ॥ ૫૮॥

તાદૃગ્રૂપો હિ પુરુષો વાસનાવિવશીકૃતઃ ।
સમ્પશ્યતિ યદૈવૈતત્સદ્વસ્ત્વિતિ વિમુહ્યતિ ॥ ૫૯॥

વાસનાવેગવૈચિત્ર્યાત્સ્વરૂપં ન જહાતિ તત્ ।
ભ્રાન્તં પશ્યતિ દુર્દૃષ્ટિઃ સર્વં મદવશાદિવ ॥ ૬૦॥

વાસના દ્વિવિધા પ્રોક્તા શુદ્ધા ચ મલિના તથા ।
મલિના જન્મહેતુઃ સ્યાચ્છુદ્ધા જન્મવિનાશિની ॥ ૬૧॥

અજ્ઞાનસુઘનાકારા ઘનાહંકારશાલિની ।
પુનર્જન્મકરી પ્રોક્તા મલિના વાસના બુધૈઃ ।
પુનર્જન્માઙ્કુરં ત્યક્ત્વા સ્થિતિઃ સંભૃષ્ટબીજવત્ ॥ ૬૨॥

બહુશાસ્ત્રકથાકન્થારોમન્થેન વૃથૈવ કિમ્ ।
અન્વેષ્ટવ્યં પ્રયત્નેન મારુતે જ્યોતિરાન્તરમ્ ॥ ૬૩॥

દર્શનાદર્શને હિત્વા સ્વયં કેવલરૂપતઃ ।
ય આસ્તે કપિશાર્દૂલ બ્રહ્મ સ બ્રહ્મવિત્સ્વયમ્ ॥ ૬૪॥

અધીત્ય ચતુરો વેદાન્સર્વશાસ્ત્રાણ્યનેકશઃ ।
બ્રહ્મતત્ત્વં ન જાનાતિ દર્વી પાકરસં યથા ॥ ૬૫॥

સ્વદેહાશુચિગન્ધેન ન વિરજ્યેત યઃ પુમાન્ ।
વિરાગકારણં તસ્ય કિમન્યદુપદિશ્યતે ॥ ૬૬॥

અત્યન્તમલિનો દેહો દેહી ચાત્યન્તનિર્મલઃ ।
ઉભયોરન્તરં જ્ઞાત્વા કસ્ય શૌચં વિધીયતે ॥ ૬૭॥

બદ્ધો હિ વાસનાબદ્ધો મોક્ષઃ સ્યાદ્વાસનાક્ષયઃ ।
વાસનાં સમ્પરિત્યજ્ય મોક્ષાર્થિત્વમપિ ત્યજ ॥ ૬૮॥

માનસીર્વાસનાઃ પૂર્વં ત્યક્ત્વા વિષયવાસનાઃ ।
મૈત્ર્યાદિવાસનાનામ્નીર્ગૃહાણામલવાસનાઃ ॥ ૬૯॥

તા અપ્યતઃ પરિત્યજ્ય તાભિર્વ્યવહરન્નપિ ।
અન્તઃશાન્તઃ સમસ્નેહો ભવ ચિન્માત્રવાસનઃ ॥ ૭૦॥

તામપ્યથ પરિત્યજ્ય મનોબુદ્ધિસમન્વિતામ્ ।
શેષસ્થિરસમાધાનો મયિ ત્વં ભવ મારુતે ॥ ૭૧॥

અશબ્દમસ્પર્શમરૂપમવ્યયં
તથાઽરસં નિત્યમગન્ધવચ્ચ યત્ ।
અનામગોત્રં મમ રૂપમીદૃશં
ભજસ્વ નિત્યં પવનાત્મજાર્તિહન્ ॥ ૭૨॥

દૃશિસ્વરૂપં ગગનોપમં પરં
સકૃદ્વિભાતં ત્વજમેકમક્ષરમ્ ।
અલેપકં સર્વગતં યદદ્વયં
તદેવ ચાહં સકલં વિમુક્તૐ ॥ ૭૩॥

દૃશિસ્તુ શુદ્ધોઽહમવિક્રિયાત્મકો
ન મેઽસ્તિ કશ્ચિદ્વિષયઃ સ્વભાવતઃ ।
પુરસ્તિરશ્ચોર્ધ્વમધશ્ચ સર્વતઃ
સુપૂર્ણભૂમાહમિતીહ ભાવય ॥ ૭૪॥

અજોઽમરશ્ચૈવ તથાજરોઽમૃતઃ
સ્વયંપ્રભઃ સર્વગતોઽહમવ્યયઃ ।
ન કારણં કાર્યમતીત્ય નિર્મલઃ
સદૈવ તૃપ્તોઽહમિતીહ ભાવય ॥ ૭૫॥

જીવન્મુક્તપદં ત્યક્ત્વા સ્વદેહે કાલસાત્કૃતે ।
વિશત્યદેહમુક્તત્વં પવનોઽસ્પન્દતામિવ ॥ ૭૬॥

તદેતદૃચાભ્યુક્તમ્ ॥

તદ્વિષ્ણોઃ પરમં પદં સદા પશ્યન્તિ સૂરયઃ । દિવીવ ચક્ષુરાતતમ્ ॥

તદ્વિપ્રાસો વિપન્યવો જાગૃવાંસઃ સમિન્ધતે । વિષ્ણોર્યત્પરમં પદમ્ ॥

ૐ સત્યમિત્યુપનિષત્ ।
ૐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥ હરિઃ ૐ તત્સત્ ॥

ઇતિ મુક્તિકોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

*MuktikA Upanishad*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*